पुणा International School
Shree Swaminarayan Gurukul, Zundal

| SUMMATIVE ASSIGNMENT 1 | |
|---|---|
| GRADE-VI | SUBJECT – SANSKRIT |
| SYLLABUS – LESSON-1 TO 8 | |

# अपठित-अवबोधनम

## प्र-1 अधोलिखितान गद्यांशान पठित्वा निर्देशानुसारम उत्तरत।

1- अहो। प्रातःकाले सूर्य उदेति। रामः प्रातःकाले सूर्योदयात पूर्व शयनं त्यजति। सः सर्वप्रथमम ईश्वरं नमति। स्वदैनिक कार्याणि सम्पादयति। भ्रमणाय उद्यानं गच्छति। भ्रमणात अनन्तंर अपि आनयति। गृहम आगत्य स्नानं कृत्वा विद्यालयस्य गणवेशं धारयति। प्रातरांशम कृत्वा विद्यालयं गच्छति।

**क- एकपदेन उत्तरत-**

1- सूर्य कदा उदेति? --------------

2- सूर्योदयात पूर्व कः शयनं त्यजति? --------------

**ख- अधोलिखितानां प्रश्नानाम पूर्णवाक्येन उत्तरत।**

1- रामः सर्वप्रथमम किम करोति?

उत्तर- -----------------------------------------------------
-----------------------------------------------------

2- रामः किं कृत्वा विद्यालयं गच्छति?

उत्तर- -----------------------------------------------------
-----------------------------------------------------

**ग-संस्कृत शब्द लिखत-**

- दूध -----------
- सुबह -----------
- भगवान -----------
- घर -----------

2- भारतः एकः विशाल देशः अस्ति। भारतस्य उत्तरस्यां दिशायां हिमालयः नाम्नः पर्वतः स्थितः अस्ति। अयं भारतस्य प्राकृतिक प्रतिहारी रूपेण स्थितोऽस्ति। कालिदासः अयं नागाधिराज अपि कथ्यते। हिमालयात गङ्गा उदभवति। साधकाः हिमालयस्य गुहासु

निवसन्ति। हिमालयस्य क्रोडे हिमाचलप्रदेश, शिमला, कश्मीर, उत्तराखण्ड इत्यात्यः प्राप्तानि सन्ति।

क- एकपदेन उत्तरत-

1- कः विशाल देशः अस्ति? -------------

2- साधकाः कुत्र निवसन्ति? -------------

3- हिमालयात कः उदभवति? -------------

4- भारतः एकः विशाल कः अस्ति? -------------

ख- अधोलिखितानां प्रश्नानाम पूर्णवाक्येन उत्तरत।

1- कालिदासेन हिमालयः किं कथ्यते?

उत्तर- ------------------------------------------------------------
------------------------------------------------------------

2- हिमालयस्य क्रोडे कानि प्राप्तानि सन्ति?

उत्तर- ------------------------------------------------------------
------------------------------------------------------------

3- भारतस्य उत्तरस्यां दिशायां कः पर्वत स्थित अस्ति?

उत्तर- ------------------------------------------------------------
------------------------------------------------------------

3- वर्षे षड ऋतवः भवन्ति। सर्वप्रथमं वसन्तः ऋतुः आगच्छति। अस्मिन ऋतौ सर्वे वृक्षाः फलैः पुष्पै च युक्ताः भवन्ति। सर्वेषु वृक्षेषु नवीनानि पत्राणि भवन्ति। कोकिलाः मधुरेण स्वरेण कूजन्ति। सरोवरेषु कमलानि विकसन्ति। तेषु भ्रमराः सानदं विचरन्ति। भ्रमराः कमलानां रसं पीत्वा मधुरं गुंजन्ति। अस्मिन समये शीतलः, मन्दः वायु प्रवहति। अयम ऋतुराजः अपि कथ्यते।

क- एकपदेन उत्तरत-

1- वर्षे कति ऋतवः भवन्ति? -----------

2- अस्मिन ऋतौ के मधुरेण स्वरेण कूजन्ति? -----------

ख- अधोलिखितानां प्रश्नानाम पूर्णवाक्येन उत्तरत।

1- सर्वेषु वृक्षेषु कानि भवन्ति?

उत्तर- ---------------------------------------------------------
---------------------------------------------------------

2- भ्रमराः किं कुर्वन्ति?

उत्तर- ---------------------------------------------------------
---------------------------------------------------------

**ग-संस्कृत शब्द लिखत-**

- कोयल -----------
- फूल -----------
- मीठा -----------
- पत्ते -----------

**प्र-2** मञ्जूषातः समुचितपदानि चित्वा कथां पूरयत-

(1) (मनोरथैः , पिपासितः , उपायम् , स्वल्पम्, पाषाणस्य, कार्याणि , उपरि, सन्तुष्टः, सन्तुष्टः, पातुम् ,इतस्ततः , कुत्रापि)

एकदा एकः काकः पिपासितः आसीत्। सः जलं पातुम् इतस्ततः अभ्रमत्। परं कुत्रापि जलं न प्राप्नोत। अन्ते सः एकं घटम् अपश्यत्। घटे स्वल्पम् जलम् आसीत्। अतः सः जलम् पातुम् असमर्थः अभवत्। सः एकम् उपायम् अचिन्तयत्। सः पाषाणस्य खण्डानि घटे अक्षिपत्। एवं क्रमेण घटस्य जलम् उपरि आगच्छत्। काकः जलं पीत्वा संतुष्टः अभवत्। परिश्रमेण एव कार्याणि सिध्यन्ति न तु मनोरथैः।

(2) **(अयोध्यावासिनः, उत्सवः, जनानां, सर्वत्र, चतुर्दशवर्षाणाः)**

भारत देशे दीपावलि सर्वेषां जनाना कृत विशेषोत्सवः मन्यते। भगवान श्री रामः यदा चतुर्देशवर्षाणा वनवासपूर्ण कृत्वा पुनःअयोध्यां आगतवान तदा अयोध्यावासिनः स्वागतार्थ अयोध्यायां सर्वत्र दीपान प्रज्वालितवन्तः एषः उत्सवः प्रतिवर्ष सर्वत्र आयोज्यते।

## (3) वार्तालापे रिक्तस्थानानि पूरयत-

-प्रियंवदा - शकुन्तले! त्वं किं करोषि?

-शकुन्तला - प्रियंवदे! अहं नत्यामि, त्वं किं करोषि?

−प्रियंवदा − शकुन्तले! <u>अहं</u> गायामि। किं <u>त्वं</u> न गायसि ?
−शकुन्तला − प्रियंवदे! <u>अहं</u> न गायामि। <u>अहं</u> तु नृत्यामि।
−प्रियंवदा − शकुन्तले! किं <u>तव</u> माता नृत्यति।
−शकुन्तला − आम्, <u>मम</u> माता अपि नृत्याति।

## रचनात्मक−कार्यम

**प्र−3** चित्राणि दृष्ट्वा पदानि नाम:उच्चारय।


कृषकः


वृषभः


भल्लूकः


मण्डूकः


कपोतः


पर्यङ्कः


दूरभाषः


काकः


सौचिकः


<u>गजः</u>


<u>काकः</u>


<u>चन्द्रः</u>







तालः ऋक्षः बिडालः


सूचिका


पिपीलिका


कुञ्चिका


द्विचक्रिका


उत्पीठिका


मक्षिका


अग्निपेटिका


मापिका


वीणा


उत्पीठिका


पेटिका


नौका


चटका


महिला


मापिका


पर्णम्


क्रीडनकम्


नारिकेलम्



सङ्गणकम्



वातायनम्



सोपानम्



उद्यानम्



उपनेत्रम्



कङ्कतम्



आम्रम्



पर्णम्



व्यजनम्



करवस्त्राणि



सूत्रम्



छत्रम्

**प्र-4 तत्समशब्दान् लिखत-**

| | |
|---|---|
| सियार | शृगालः |
| कौआ | काकः |
| मक्खी | मक्षिका: |
| बन्दर | वानरः |
| बगुला | बकः |
| चोंच | चञ्चुः |
| नाक | नासिका: |

**प्र-5-**मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-

| बङ्गोपसागरः | प्रायद्वीपः | पर्यटनाय | क्रीडा | सङ्गमः |
|---|---|---|---|---|

(क) कन्याकुमारीतटे त्रयाणां सागराणां सङ्गमः भवति।

(ख) भारतदेशः प्रायद्वीपः इति कथ्यते।

(ग) जनाः समुद्रतटं पर्यटनाय आगच्छन्ति।

(घ) बालेभ्यः क्रीडा रोचते।

(ङ) भारतस्य पूर्वदिशायां बङ्गोपसागरः अस्ति।

**प्र-6- उचितपदैः वाक्यनिर्माणं कुरुत–**

| मम | तव | आवयोः | युवयोः | अस्माकम् | युष्माकम् |
|---|---|---|---|---|---|

क. एतत् मम गृहम्

ख. आवयोः मैत्री दृढा।

ग. एषः तव विद्यालयः।

घ. एषा युवयोः अध्यापिका।

ङ. भारतम् अस्माकं देशः।

च. एतानि युष्माकं पुस्तकानि।

## व्याकरण

**प्र-7-वर्णसंयोजनं कृत्वा पदं कोष्ठके लिखत-**

| | | |
|---|---|---|
| 1-प् + अ + र् + ण् + अ + म् | = | पर्णम् |
| 2-ख् + अ + न् + इ + त् + र् + अ + म् | = | खनित्रम् |
| 3-प् + उ + र् + आ + ण् + आ + न् + इ | = | पुराणानि |
| 4-प् + ओ + ष् + अ + क् + आ + ण् + इ | = | पोषकाणि |
| 5-क् + अ + ङ् + क् + अ + त् + अ + म् | = | कङ्कतम् |
| 6-च् + अ + ष् + अ + क् + अः | = | चषकः |
| 7-स् + औ + च् + इ + क् + अः | = | सौचिकः |

8- श् + उ + न् + अ + क् + औ = शुनकौ

9- ध् + आ + व् + अ + त् + अः = धावतः

10- व् + ऋ + द् + ध् + आः = वृद्धाः

11- ग् + आ + य्+ अ + न् + त् + इ = गायन्ति

12-क् + उ + र् + उ + त् + अः = करुतः

13- उ + द् + य् + आ + न् + ए = उद्याने

14- स् + थ् + आ + ल् + इ + क् + आ = स्थालिका

15- घ् + अ + ट् + इ + क् + आ = घटिका

16- स् + त् + र् + ई + ल् + इ + ङ् + ग् + अः = स्त्रीलिंगः

17- म् + आ + प् + इ + क् + आ = मापिका

**प्र-8-**अधोलिखितानां पदानां वर्णविच्छेदं कुरुत-

1-व्यजनम् = व् + य् + अ + ज् + अ + न् + अ + म्

2- पुस्तकम् = प् + उ + स् + त् + अ + क् + अ + म्

3- भित्तिकम् = भ् + इ + त् + त् + इ + क् + अ + म्

4- नूतनानि = न् + ऊ + त् + अ + न् + आ + न् + इ

5- वातायनम् = व् + आ + त् + आ + य् + अ + न् + अ + म्

6- उपनेत्रम् = उ + प् + अ + न + ए + त् + र् + अ + म्

7-सीव्यति = स् + ई + व् + य् + त् + इ

8- वर्णाः = व् + अ + र् + ण् + आः

9- कुक्कुरौ = क् + उ + क् + क् + उ + र् + औ

10- मयूराः = म् + अ + य् + ऊ + र् + आः

11- बालकः = ब् + आ + ल् + क् + अः

12-चटके = च + अ + ट् + अ + क् + ए

13- धाविकाः = ध + आ + व् + इ + क् + आः

14- कुञ्चिका = क् + उ + ञ् + च् + इ + क् + आ

15- खट्वा = ख् + अ + ट् + व् + आ

16- छुरिका = छ् + उ + र् + इ + क् + आ

## प्र-9- विलोमपदानि लिखत-

- शत्रुः – मित्रम्
- सुखदम् - दुखदम्
- शत्रुता - मित्रता
- अप्रसन्नः - प्रसन्नः
- दुर्व्यवहारः - सद्व्यवहारः
- सायम् - प्रातः
- असमर्थः - समर्थ
- सार्थक - निरर्थक
- कृष्ण - श्वेतः
- अनुक्तम - उक्तम
- गच्छति - आगच्छति
- जागृतस्य - सुप्तस्य

## प्र-10 समानार्थक पदानि लिखत-

- वचने - कथने
- वैनतेयः - गरुडः
- पुस्तके - ग्रन्थे
- उद्यमेन - परिश्रमेण
- पिकः - कोयलः

## प्र-11 तृतीयाविभक्तिप्रयोगेण रिक्तस्थानानि पूरयत-

यथा- व्योमः मित्रेण सह गच्छति। (मित्र)

(क) बालकाः बालिकाभिः सह पठन्ति। (बालिका)
(ख) तडागः कमलैः विभाति। (कमल)
(ग) अहमपि कन्दुकेन खेलामि। (कन्दुक)
(घ) अश्वाः अश्वैः सह धावन्ति। (अश्व)
(ङ) मृगाः मृगैः सह चरन्ति। (मृग)

## प्र-13- कोष्ठकाते उचितपदप्रयोगेण रिक्तस्थानानि पूरयत-

(क) धनिक निर्धनाय धनं ददाति। (निर्धनम्/निर्धनाय)
(ख) बालः पठनाय विद्यालयं गच्छति। (पठनाय/पठनेन)
(ग) सज्जनाः परोपकाराय जीवन्ति। (परोपकारम्/परोपकाराय)
(घ) प्रधानाचार्यः छात्रेभ्यः पारितोषिकं यच्छति। (छात्राणाम्/छात्रेभ्यः)
(ङ) शिक्षकाय नमः। (शिक्षकाय/शिक्षकम्)

## प्र- 14-कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत–

(क) ----- पठामि। (वयम्/अहम्)
(ख) ----- गच्छथः। (युवाम्/यूयम्)
(ग) एतत------ पुस्तकम्। (माम्/मम्)
(घ)-------- क्रीडनकानि। (युष्मान्/युष्माकम्)
(ङ) ------- छात्रे स्वः। (वयम्/आवाम्)
(च) एषा ---- लेखनी। (तव/त्वाम्)

## प्र-15- कोष्ठकेषु प्रदत्तशब्देषु उपयुक्ताविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-

(क) त्वं जलं पिबसि। (जल)
(ख) छात्रः दूरदर्शनं पश्यति। (दूरदर्शन)
(ग) वृक्षाः पवनं पिबन्ति। (पवन)
(घ) ताः कथां लिखन्ति। (कथा)
(ङ) आवाम् जन्तुशालां गच्छावः। (जन्तुशाला)

**प्र-16- कोष्ठकात् उचितं शब्दं चित्वा वाक्यं पूरयत-**

यथा- बालिका पठित। (बालिका/बालिकाः)

(क) <u>अजेः</u> चरतः। (अजाः/अजे)

(ख) <u>द्विचक्रिका</u> सन्ति। (द्विचक्रिके/द्विचक्रिकाः)

(ग) <u>नौका</u> चलति। (नौके/नौका)

(घ) <u>सूचिका</u> अस्ति। (सूचिके/सूचिका)

(ङ) <u>मक्षिकाः</u> उत्पतन्ति। (मक्षिकाः/मक्षिके)

**प्र-17-अधोलिखितेषु वाक्येषु कर्तृपदानि चिनुत-**

(क) वृक्षाः नभः शिरस्सु वहन्ति। - वृक्षाः

(ख) विहगाः वृक्षेषु कूजन्ति। - विहगाः

(ग) पयोदर्पणे वृक्षाः स्वप्रतिबिम्बं पश्यन्ति। - वृक्षाः

(घ) कृषकः अन्नानि उत्पादयति। - कृषकः

(ङ) सरोवरे मत्स्याः सन्ति। - मत्स्याः

## साहित्य

**प्र-18- अधोलिखितानां प्रश्नानाम् उत्तरं लिखत-**

(1) वृक्षाः कैः पातालं स्पृश्यन्ति?

**उत्तर** - वृक्षाः पादैः पातालं स्पृश्यन्ति।

(2) वृक्षाः किं रचयन्ति?

**उत्तर**- वृक्षाः वनम् रचयन्ति।

(3) विहगाः कुत्र आसीनाः?

**उत्तर**- विहगाः शाखादोला आसीनाः।

(4) कौतुकेन वृक्षाः किं पश्यन्ति?

**उत्तर**- कौतुकेन वृक्षाः पयोदर्पणे स्वप्रतिबिम्बम् पश्यन्ति।

(5) सर्वे जन्तवः केन तुष्यन्ति?

**उत्तर** -सर्वे जन्तवः प्रियवाक्येनप्रदानेन तुष्यन्ति।

(6) पिककाकयोः भेदः कता भवति?

उत्तर - पिककाकयोः भेदः वसंतसमये भवति।

(7) कः गच्छन् योजनानां शातन्यपि याति?

उत्तर - पिपीलकः गच्छन् योजनानां शातन्यपि याति।

(8) अस्माभिः किं वक्तव्यम्?

उत्तर-अस्माभिः प्रियं वक्तव्यम

(9)जनाः काभिः जलविहारं कुर्वन्ति?

उत्तर - जनाः नौकाभिः जलविहारं कुर्वन्ति।

(10) भारतस्य दीर्घतमः समुद्रतटः कः?

उत्तर- भारतस्य दीर्घतमः समुद्रतटः चेन्नईनगरस्य मेरीनातटः अस्ति।

(11) जनाः कुत्र स्वैरं विहरन्ति?

उत्तर- जनाः मुंबईनगरस्य जुहूतटे स्वैरं विहरन्ति।

(12) बालकाः बालुकाभिः किं रचयन्ति?

उत्तर- बालकाः बालुकाभिः बालुकागृहं रचयन्ति।

(13) कोच्चितटः केभ्यः ज्ञायते?

उत्तर- कोच्चितटः नारिकेलफलेभ्यः ज्ञायते।

(14) शृगालस्य मित्रं कः आसीत्?

उत्तर -शृगालस्य मित्रं बकः आसीत्।

(15) स्थालीतः कः भोजनं न अखादत्?

उत्तर -स्थालीतः बकः भोजनं न अखादत्।

(16) बकः शृगालाय भोजने किम् अयच्छत्?

उत्तर -बकः शृगालाय भोजने संकीर्णमुखे कलशे क्षीरोदनम् अयच्छत्।

(17)शृगालस्य स्वभावः कीदृशः भवति?

उत्तर -शृगालस्य स्वभावः कुटिलस्वभावः भवति।

## प्र-19 भिन्नप्रकृतिकं पदं चिनुत-

(क) गङ्गा, लता, यमुना, नर्मदा। - लता

(ख) उद्यानम्, कुसुमम्, फलम्, चित्रम्। - चित्रम्

(ग) लेखनी, तूलिका, चटका, पाठशाला। - चटका

(घ) आम्रम्, कदलीफलम्, मोदकम्, नारङ्गम्। - मोदकम

## यथायोग्यं योजयत-

1- समुद्रतटः -पर्यटनाय

2- क्रीडनकम् -खेलनाय

3- दुग्धम् -पोषणाय

4- दीपकः -प्रकाशाय

5- विद्या -ज्ञानाय

## प्र-20 श्लोकांशान् योजयत-

| क | ख |
|---|---|
| उद्यमेन हि सिध्यन्ति | कार्याणि न मनोरथैः। |
| न हि सुप्तस्य सिंहस्य | प्रविशन्ति मुखे मृगाः। |
| पुस्तके पठितः पाठः | जीवने नैव साधितः। |
| अगच्छन् वैनतेयोऽपि | पदमेकं न गच्छति। |
| वसन्तसमये प्राप्ते काकः | काकः पिकः पिकः। |

| क | ख |
|---|---|
| तस्मात् प्रियं हि वक्तव्यं | वचने का दरिद्रता। |
| गच्छन् पिपीलको याति | योजनानां शतान्यपि। |
| प्रियवाक्यप्रदानेन | सर्वे तुष्यन्ति जन्तवः। |
| किं भवेत् तेन पाठेन | जीवने यो न सार्थकः। |
| काकः कृष्णः पिकः कृष्णः | को भेदः पिककाकयोः। |

# प्र-21-सरलार्थ कुरुत-

| | |
|---|---|
| 1- १-एषा का? | यह क्या है? |
| एषा दोला। | यह झूला है। |
| चेला कुत्र अस्ति? | झूला कहाँ है? |
| डोला ुपवने अस्ति। | झूला बाग में है। |
| | |
| २-सा का? | वह क्या है? |
| सा घटिका। | वह घड़ी है। |
| घटिका किं सूचयति? | घड़ी क्या दिखाती है? |
| घटिका समय सूचयति। | घड़ी समय दिखाती है। |
| | |
| ३-एते के ? | ये दोनो क्या है? |
| किम एते कोकिले? | क्या ये दोनो कोुल हैं? |
| न, एते चटके। | नही, ये दोनो गौरेया है। |
| चटके किं कुरुतः? | दोनों गौरेया क्या करती है? |
| एते विहरतेः । | ये दोनो विहार कर रही है। |

---